# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली



# शिक्षणाधिगमकेन्द्रम्

## पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजना

### शिक्षामन्त्रालयः, भारतसर्वकारः

### चरणम्-V, कार्यक्रमः - 06

## साप्ताहिक-ऑनलाइन-राष्ट्रियसङ्कायविकासकार्यक्रमः

# गूगलटूल्स-प्रयोगः अनुप्रयोगश्च

**09 तः 13 अगस्त, 2021 (सोमवासरः-शुक्रवासरः)**

## परिचयः

नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य (केन्द्रीयविश्वविद्यालयस्य) शिक्षणाधिगमकेन्द्रस्य स्थापना **भारतसर्वकारस्य शिक्षामन्त्रालयस्य पण्डितमदनमोहनमालवीय-राष्ट्रिय-शिक्षक-शिक्षणयोजनानन्तर्गतत्वेन** (PMMMNMTT) पाठ्यचर्यायाः शिक्षणशास्त्रस्य च उत्कृष्टताकेन्द्रस्य घटकस्यान्तर्गतत्वेन कृताऽस्ति। एषा योजना शिक्षायाः सर्वस्तरेषु गुणवत्तावर्धनाय आरब्धा। केन्द्रस्यास्य मुख्योद्देश्यमस्ति भाषाशिक्षायाः विशिष्टरूपेण संस्कृताध्यापकेषु अध्यापकशिक्षकेषु च शिक्षणाधिगमप्रणालीनामभिकल्पन-विकास-क्रियान्वयन-मूल्याङ्कनसम्बद्धं च कौशलोत्पादनम्। **इदं केन्द्रं भारतसर्वकारस्य शिक्षामन्त्रालयस्य उच्चशिक्षाविभागेन नवनियुक्तानामध्यापकानां कृते निर्धारितस्य अनिवार्य-मासिक-संकाय-अनुबोधन-कार्यक्रमस्य (FIP) संचालनाय निर्दिष्टेषु 30 नवकेन्द्रेषु चिह्नितमस्ति। केन्द्रमिदं संस्कृतविषये SWAYAM मञ्चमाध्यमेन शिक्षणे वार्षिकपुनश्चर्यापाठ्यक्रमनिर्माणाय Annual Refresher Program in Teaching (ARPIT – 2018, 2019, 2020) राष्ट्रियसंसाधनकेन्द्ररूपेण (NRC) अधिसूचितमस्ति। केन्द्रेणानेन उच्चप्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतशिक्षणाय पृथक्-पृथक् द्वयोः संदर्शिकयोः प्रकाशनमपि कृतम्। अद्यावधि केन्द्रेण 39 कार्यक्रमाः 3 संकायानुबोधनकार्यक्रमाश्च सफलतया समायोजिताः। पञ्चमचरणस्य सर्वेषां कार्यक्रमाणां संचालनं माननीयकुलपतिमहोदयानां संरक्षणे भविष्यति।**

## सन्दर्भः

वर्तमानशैक्षिकपरिदृश्ये द्रुतज्ञानविस्फोटकारणेन प्रौद्योगिकी न केवलमस्माकं दैनन्दिनजीवनस्य अपितु अस्माकं शिक्षाप्रणालीनामपि अभिङ्गत्वेन समुपस्थिता वर्तते। परिणामतः सर्वस्तराणां शैक्षिकप्रक्रियासु प्रौद्योगिक्याः ज्ञानस्य, प्रयोगस्य समन्वयनस्य च कुशलतायाः महती आवश्यकता उत्पन्ना जाता। सन्दर्भेऽस्मिन् छात्राणां शिक्षकाणाञ्च दक्षताम्, उत्पादकतां प्रभाविताञ्च संवर्द्धनाय 'गूगल' महत्त्वपूर्णभूमिकां निर्वहति। सम्प्रेषण-सहयोग-प्रलेखन-भण्डारण-अंतःक्रियात्मकाधिगमाय ऑनलाइनशिक्षणाय च गूगल एप्स-सर्वश्रेष्ठमुपकरणं मन्यते। एतानि वेब-आधारितसन्देशप्रेषणाय सहयोगात्मकानि एप्स सन्ति, डाउनलोड इनस्टॉल-सॉफ्टवेयर्स अपेक्षया एतानि सेवाप्रदातृरूपेण भवन्ति। 'कदापि कुतश्चिदपि' सूचनाप्रदानस्य ज्ञानाभिगम्यतायाश्च पद्धतीनां रूपांतरणसामर्थ्यकारणतः एतेषां प्रयोगकौशलम् आवश्यकं वर्तते। सन्दर्भेऽस्मिन् गूगल-टूल्स-इत्यस्य शैक्षिकप्रक्रियासु प्रयोगसमन्वययोः अनुप्रयोगस्य च ज्ञानप्रदानाय कौशलसंवर्द्धनाय च साप्ताहिक-सङ्कायविकासकार्यक्रमस्य आयोजनं केन्द्रेण क्रियते।

## उद्देश्यानि

अस्याः कार्यशालाः उद्देश्यानि सन्ति -

- गूगलटूल्स यथा यथा- ड्राइव (डॉक्स, शीट, स्लाइड, फॉर्म), कैलेण्डर, कीप, मीट, क्लासरूम, पॉडकास्ट इत्यादीनां सामान्यकार्याणां परिचयप्रदानम्।
- शैक्षिकप्रक्रियासु विविध-गूगल टूल्स-इत्यादीनां प्रयोगसमन्वययोः प्रक्रियायाम् अन्तर्दृष्टिप्रदानम्।
- विविध-गूगलटूल्स-इत्यादीनां प्रयोगाअनुप्रयोगकौशलानां कुशलतानाञ्च अभिवृद्धकरणम्।

## लक्ष्यसमूहः

- सर्वेषां विषयाणाम् उच्चशिक्षासंकायसदस्याः, विशेषरूपेण भाषाशिक्षकेभ्यः परम्परागतविषयाणां यथा- व्याकरण-वास्तुशास्त्र-दर्शन-साहित्य-धर्मशास्त्र-ज्योतिषशास्त्रस्य च शिक्षकेभ्यः प्राथम्यं दास्यते।
- परम्परागतविश्वविद्यालयेभ्यः आधुनिकविश्वविद्यालयेभ्यश्च अध्यापकशिक्षकाः।
- केवलं संस्कृतविषयस्य TGT-PGT शिक्षकाः।

## पंजीकरणम्

कार्यशालायाः **पंजीकरणशुल्कं ₹500/- (अप्रतिदेयम्)** निर्धारितमस्ति। इच्छुकप्रतिभागिनः https://forms.eduqfix.com/slbsnsuform/home लिंकद्वारा **07 अगस्त, 2021 अपराह्न 01 वादनपर्यन्तं** ऑनलाइनपंजीकरणं कर्तुं शक्नुवन्ति। अधिकतमप्रवेशक्षमतानुगुणं पंजीकरणदृष्ट्या एतत् लिंक अंतिमदिनांकतः पूर्वमपि अवरोद्धुं करिष्यते। कार्यशालायां **प्रवेशक्षमता 100** अस्ति। पंजीकरणं **'पूर्वमागच्छन्तु पूर्वं प्राप्नुवन्तु'** आधारेण भविष्यति।

### सक्रियप्रतिभागतायै अपेक्षितसामग्री : -

1. लैपटॉप/ कैमरा-माइक्रोफोन संयुक्त कंप्यूटर/स्मार्टफ़ोन।
2. उत्तम इन्टरनेट कनेक्टिविटी (अन्तर्जाल सम्पृक्तता) न्यूनातिन्यूनं 5 जीबी डाटा प्रतिदिनम् स्यात्।

## महत्त्वपूर्णसूचना

ऑनलाइन प्लेटफार्मः
गूगल मीट

- ✓ प्रतिभागितायै ऑनलाइन पंजीकरणमावश्यकमस्ति।
- ✓ कृपया पंजीकरणप्रपत्रे स्वकीयं वैध ईमेल, Whatsapp संख्यां च सूचयन्तु यतोहि कार्यशालासम्बद्धं सर्वमपि सम्प्रेषणं अनयोः माध्यमेन भविष्यति।
- ✓ कार्यशालायाः प्रतिभागिता/ पूर्णता (निष्पादनाधारितं ग्रेड) ई-प्रमाणपत्रं प्रदास्यते।
- ✓ *विश्वविद्यालयानुदानायोगस्य 2018 अधिनियमानुगुणम् अस्य सङ्कायविकासकार्यक्रमस्य प्रमाणपत्रस्य CAS (Career Advancement Scheme) निमित्तं वैधता अस्ति। (पद संख्या. 18.0 (ix)).*

**समन्वयकः संयोजकश्च** — प्रो. अमितापाण्डेयभारद्वाजः
निदेशकः

**सह-संयोजकः** — डॉ. पिंकीमलिक एवं डॉ. दिनेशयादवः

**कार्यक्रमसुगमकर्तारः** — श्रीसुरेन्द्रनागरः,
श्रीज्ञानचन्दशर्मा,
श्रीराकेशकाण्डपालः,
श्रीअक्षतडबराल,
श्रीसचिनकुमारश्च।

संरक्षकः
**प्रो. रमेशकुमारपाण्डेयः**
कुलपतिः

आयोजकः
# शिक्षणाधिगमकेन्द्रम्

**पण्डितमदनमोहनमालवीय-राष्ट्रीय-शिक्षक-शिक्षणयोजना, शिक्षामन्त्रालयः, भारतसर्वकारः**

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

(केन्द्रीयविश्वविद्यालयः), नैक द्वारा 'ए' श्रेण्यां प्रत्यायितः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली- 110016

अतिरिक्तसूचनार्थम्-
सम्पर्कसूत्रम् -9891777666, 9716692396, 8285513959